

## षष्ठः पाठः

# अहं नमामि



अहं नमामि मातरम्
गुरुं नमामि सादरम् ॥1॥

स्वयं पठामि सर्वदा
प्रियं वदामि सर्वदा ॥2॥

हितं करोमि सर्वदा
शुभं करोमि सर्वदा ॥3॥

हरिं नमामि सादरम्
गुरुं नमामि सादरम् ॥4॥

चलामि नीति-सत्पथे
हरामि मातृभू-व्यथाम् ॥5॥

दधामि साधुताव्रतम्
सृजामि कीर्तिसत्कथाम् ॥6॥

प्रभुं जपामि सादरम्
अहं नमामि मातरम् ॥7॥

*इच्छाराम द्विवेदी 'प्रणवः'*



## शब्दार्थाः

| | | |
|---|---|---|
| **सादरम्** | – | आदर के साथ |
| **नीतिसत्पथे** | – | नीति के सच्चे रास्ते पर |
| **मातृभू-व्यथाम्** | – | मातृभूमि की व्यथा को |
| **साधुताव्रतम्** | – | सज्जनता के व्रत को |
| **हरामि** | – | हरण करता हूँ/करती हूँ, दूर करता हूँ/करती हूँ |
| **दधामि** | – | धारण करता हूँ/करती हूँ |
| **सृजामि** | – | रचना करता हूँ/करती हूँ |
| **कीर्तिसत्कथाम्** | – | यश की सच्ची कहानी को |



## अभ्यासः

**1. एतां कवितां सस्वरं गायत।**

**2. कवितायाः निम्नलिखितासु पङ्क्तिषु रिक्तस्थानानि पूरयत–**

(क) ...................... पठामि सर्वदा।

(ख) हितं ...................... सर्वदा।

(ग) चलामि नीति ......................।

(घ) दधामि ...................... व्रतम्।

(ङ) प्रभुं ...................... सादरम्।

**3. एकशब्देन उत्तरं लिखत-**

(क) अहं कं नमामि?

(ख) अहं प्रभुं कथं जपामि?

(ग) अहं किं हरामि?

(घ) अहं किं व्रतं दधामि?

(ङ) अहं किं सृजामि?

**4. एतैः क्रियापदैः वाक्यानि रचयत-**

| | |
|---|---|
| नमामि | चलामि |
| पठामि | जपामि |
| सृजामि | करोमि |

**5. स्वकल्पनां कृत्वा वाक्यानि रचयत-**

| | | | |
|---|---|---|---|
| **यथा**- | अहं | चित्रं | सृजामि। |
| (क) | वयं | .................... | .................... । |
| (ख) | .................... | .................... | वदामि। |
| (ग) | अहं | .................... | .................... । |
| (घ) | .................... | .................... | चलामः। |
| (ङ) | त्वं | .................... | .................... । |

## 6. प्रश्नानाम् उत्तराणि लिखत–

(क) त्वं नित्यं कां नमसि?

(ख) त्वं स्वयं किं किं करोषि?

(ग) त्वं कस्याः व्यथां हरिष्यसि?

(घ) त्वं किं व्रतं धारयसि?

(ङ) त्वं किं सृजसि?

## 7. मञ्जूषातः समुचितपदं गृहीत्वा वाक्यं पूरयत–

| यूयम् | बालकौ | त्वम् | वयम् | बालिकाः |
|---|---|---|---|---|

(क) .......................... पापं हरसि।

(ख) .......................... गृहाकार्यं कुरुतः।

(ग) .......................... चित्राणि सृजथ।

(घ) .......................... राष्ट्रगीतं गायामः।

(ङ) .......................... देवीं नमन्ति।



**ध्यातव्यम्–**

शिक्षकेन सस्वरगानाय प्रयासः करणीयः।